# Model Question Paper

**I Sem B.A. Examination**

**LANGUAGE – SANSKRIT 1**

**Gajendramokshasangraha, Grammar and Comprehension**

Time: 2hrs Max. Marks: 60

Instructions: 1) Answer in Sanskrit / Kannada / English

2) Answer Q.Nos I, V and IV in Sanskrit only

I. समीचीनम् उत्तरं लिखत । 1x10 =10

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select and write the correct answer.

1. रघुवंशमहाकाव्यस्य कर्ता कः ?

   अ) भोजः आ) व्यासः इ) अश्वघोषः ई) कालिदासः

2. वेदाः कति ?

   अ) चत्वारः आ) पञ्च इ) त्रयः ई) षट्

3. व्यासस्य पुत्रः कः ?

   अ) सूतः आ) शुकः इ) शौनकः ई) दत्तः

4. विपञ्चिका पदस्य अर्थः कः ?

   अ) मृदङ्गः आ) वीणा इ) मुरलिः ई) घण्टा

5. गजेन्द्रः कुत्र वसति स्म ?

   अ) त्रिकूटे आ) विध्ये इ) हिमालये ई) मन्दरे

6. गजेन्द्रः केन जग्राह ?

   अ) सिंहेन आ) गृध्रेण इ) नक्रेण ई) सर्पेण

7. गजेन्द्रं का उपदिष्टवती ?

   अ) गोपी आ) शुकी इ) कपोती ई) करिणी

8. विष्णुः नक्रं केन अहनत् ?

   अ) चक्रेण आ) बाणेन इ) खड्गेन ई) वज्रेण

9. अखिलगुरुः कः ?

अ) अग्निः आ) नारायणः इ) इन्द्रः ई) यमः

10. विष्णोः वाहनं किम् ?

अ) गरुडः आ) अश्वः इ) गजः ई) हंसः

II. द्वयोः प्रबन्धं लिखत । ಎರಡಕ್ಕೆ ಪ್ರಬಂಧ ಬರೆಯಿರಿ. 2x8 =16

Write an essay on any two of the following.

अ) गजेन्द्रमोक्षसंग्रहे वर्णितं नैदाघं विवृणुत ।
ಗಜೇಂದ್ರಮೋಕ್ಷಸಂಗ್ರಹದಲ್ಲಿ ವಿವರಿಸಿದಂತೆ ಬೇಸಿಗೆಯನ್ನು ವರ್ಣಿಸಿರಿ.
Describe summer as depicted in Gajendramoshasangrha.

आ) महाकाव्यलक्षणानि विवृणुत ।
ಮಹಾಕಾವ್ಯದ ಲಕ್ಷಣಗಳನ್ನು ವರ್ಣಿಸಿರಿ.
Describe the charecteristics of Mahakavya

इ) गजेन्द्रमोक्षसंग्रहस्य कथां लिखत ।
ಗಜೇಂದ್ರಮೋಕ್ಷಸಂಗ್ರಹದ ಕಥೆಯನ್ನು ಬರೆಯಿರಿ.
Describe the story of Gajendramokshasamgraha.

III. त्रयाणां श्लोकानाम् अनुवादं कृत्वा विवृणुत । 3x3 =9

ಯಾವುದಾದರೂ ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate any three shlokas and explain

१. आस्ते वनं विविधगुल्मलतातृणाढ्यं
शार्दूलसिंहवृकसर्पमुखोरिसत्त्वैः ।
व्याप्तं गिरीन्द्रपृथुकूटतले विशालं
मातङ्गयूथपतिरेक उवास यत्र ॥

२. अस्ति त्रिकूट इति विश्रुतपर्वतेन्द्रो
गन्धर्वसिद्धविबुधाश्रयपुण्यभूमिः ।
सद्यः प्रदक्षिणपरो निजवीचिहस्तैः

यस्मै समर्पयति दुग्धसमुद्रराजः॥

३. प्रह्लादनारदमुखैर्बहुपुण्यपात्रैः

पेपीयमानसुरसापि निरन्तरं या ।

नैवास्ति तृप्तिरिति वर्ण्यविचित्रसौख्या

वक्ष्ये कथां मधुमयीं मधुहन्तुरेताम् ॥

४. श्रुत्वा समस्तभुवनस्य दिधक्षयेव

क्रोधोद्यतो ज्वलितुमेष रविः प्रवृत्तः।

क्षुद्रोऽपि नैव सहतेऽभिभवं परस्मात्

पूर्ण-प्रताप-सहितः किमुताभिमानी ॥

५. सन्तापमात्मजनितं स्वयमेव सोढुं

शक्तिर्नचण्डकिरणस्य किमन्यजन्तोः ।

तप्तां हि शीतलयितुं तनुमेष भानुः

गृह्णाति वारि ननु सर्वजलाशयेभ्यः॥

IV. वाक्यद्वयं ससन्दर्भं विवृणुत । 2x3 = 6

ಯಾವುದಾದರೂ ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಸಂದರ್ಭ ವಿವರಿಸಿ.

Explain with reference to context any two of the following sentences.

१. अङ्गार-वृष्टिमवनौ कुरुते किमद्य ।

२. सर्वर्तु-भोग्य-मृतुमत्-प्रथितं बभूव ।

३. आनन्ददां वरतनुं रसिको वृणीते ।

४. येषां त एव पुरुषा अधिकारिणोऽस्मिन् ।

V. संस्कृतभाषया उत्तराणि लिखत ।

अ) पञ्चानां लिङ्ग-विभक्ति-वचनानि लिखत । 5x1 =5

| | | | |
|---|---|---|---|
| १. रामस्य | २. हरौ | ३. भगवता | ४. भक्ताः |
| ५. ययोः | ६. अधिकारिणः | ७. नैधाघे | ८. सरसि |

आ) चतुर्णां लकार-पुरुष-वचनानि लिखत । 4x1 =4

| | | | |
|---|---|---|---|
| १. पठन्तु | २. लभेय | ३. निनाद | ४. भविष्यसि |
| ५. अभूत् | ६. अगच्छन् | ७. करोमि | ८. सीदन्ति |

VI. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि सस्कृतभाषया लिखत । 2x5=10

गोदावार्याः तीरे एकः विशालः शाल्मलीतरुः आसीत्। तत्र नानादिग्देशादागत्य पक्षिणः रात्रौ निवसन्ति स्म। एकदा एकः कपोतानां यूथम् आकाशे विसर्पन् भूमौ तण्डुलानां कणान् अपश्यत्। कपोतानां राजा चित्रग्रीवः 'कथम् अस्मिन् निर्जने वने तण्डुलकणानां सम्भवः। भद्रमिदं न पश्यामि। सम्यक् निरूप्य अवतरत। ' इति कपोतान् अवदत्। परन्तु जिह्वालोलुपाः अन्ये कपोताः अवधीर्य चित्रग्रीववचनम् अवतार्य पाशे बद्धाः अभवन्। अत एव उच्यते – सहसा विदधीत न क्रियाम् इति।

अधोलिखितप्रश्नानाम् उत्तरं संस्कृतभाषया लिखत ।

१ चित्रग्रीवः किमवदत् ?
२ पक्षिणः कुत्र निवसन्ति ?
३ शाल्मलीतरुः कुत्र आसीत् ?
४ अस्याः नीतिः का ?
५ कपोताः कुत्र बद्धाः अभवन् ?

----------------------